# समयानुवर्त्तिता

*अयं विषय: डॉ. कुमारचन्द्रमिश्रेण रचित: । इदानीन्तनसमाजे जनेषु समयानुवर्त्तिताया: नितराम् अभाव: दृश्यते । समयानुवर्त्तिता कस्यचित् प्रतिष्ठितजनस्य महान् गुण: । छात्राणां स्वभावपरिवर्त्तनाय अयं विषय: पुस्तकेऽस्मिन् प्रदत्त: ।*

माधव: ग्रामविद्यालये पाठं समाप्य उच्चविद्यालयमगच्छत् । एकस्मिन् आवासिक-विद्यालये नामोल्लेखमकरोत् । पिता विद्यालयस्य छात्रावासे स्थातुं व्यवस्थां कृत्वा सर्वाणि साधनानि तस्मै दत्तवान् ।

विद्यालयस्य प्रथमदिवस: । पूर्वस्यां रात्रौ सूचनां प्राप्तवान् नववादने कक्षारम्भ: । माधव: विद्यालयं गन्तुं यदा सज्जीभवति तदा नववादनमभवत् । अनन्तरं स: मन्दं मन्दं विद्यालयमगच्छत् । यावदसौ कक्षासमीपमगच्छत् तावत् सर्वे छात्रा: कक्षायामुपस्थिता: आसन्, पाठस्यारम्भ: अपि अभवत् । शिक्षक: तस्मै कक्षायामुपवेष्टुमनुमतिं प्राददात् । परन्तु अवदत् - भो: छात्र ! भवान् यथाकालमागच्छतु ।

अपरेद्यु: यथासमयं कक्षां प्राप्तुमसौ चेष्टामकरोत् । तथापि केनापि कारणेन विलम्बोऽभवत् । स पुनश्च दशनिमेषविलम्बेन कक्षामागच्छत् । शिक्षक: पुनरपि अवदत्–वत्स ! भवान् यथाकालं नागच्छति इति महत् दु:खम् ।

छात्राणां पुरत: स: वारं वारं लज्जित: अपमानितश्चाभवत् । स व्यचिन्तयत् - तमन्तरेण अन्य: न कश्चित् छात्र: विलम्बेन आगच्छति । अत: तृतीयदिवसे बहुप्रयासेन पञ्चदशनिमेषेभ्य: पूर्वमेव विद्यालयमगच्छत् ।

यदा विद्यालयमपश्यत् तदा विद्यालयस्य मुख्यद्वारं पिहितमासीत् । एकोऽपि छात्र: शिक्षको वा न तत्रासीत् । साक्षात् पञ्चोननववादने विद्यालयस्य सेवक: आगच्छत् द्वारमुदघाटयत् च । क्रमेण सर्वे छात्रा: शिक्षकाश्च समागता: । साक्षात् नववादने घण्डानाद: जात: । अनन्तरं पाठस्यारम्भ: । एकोऽपि छात्र: विलम्बेन नागच्छत् । माधव: तद्दिने प्रसन्न: आसीत् । यत: स: पूर्वमेव आगतवान् । स: विस्मित: अभवत् - शिक्षक: पुनरवदत् - भवत: समयज्ञानं नास्ति ।

माधवोऽवदत् - श्रीमन् ! अद्याहं विलम्बेन नागच्छामि । पञ्चदशनिमेषेभ्य: पूर्वमागच्छामि । तथापि भवान् एवं वदति । मम मनसि दु:खम् । शिक्षक: सस्मितं बोधयति – विलम्बेन आगमनं तु न साधु । पञ्चदशनिमेषभ्य: पूर्वम् आगमनमपि न साधु । पूर्वमागत्य किं कृतम् ? द्वारमभित: अवस्थानं कृतम् । तस्मिन् समये स्वप्रकोष्ठे किञ्चित् अध्ययनं कर्तुं शक्यम् ।

एतत् श्रुत्वा लज्जितः माधवः शिक्षकस्य समीपे क्षमायाचनां कृतवान् । समयस्य मूल्यं च ज्ञातवान् । अन्यस्मिन् काले सर्वदा समयस्य परिपालनं तस्य महान् गुणः अभवत् ।

गच्छता कालेन शास्त्राध्ययनं कृत्वा स अवगतवान् यत्, अस्माकं भारतवर्षे यत् पञ्चाङ्गं प्रचलति तत् सर्वं भारतीयसमयगणनानुसारेण भवति । कदा सूर्योपरागः चन्द्रग्रहणं वा यथानिर्दिष्टं तदनुसारमेव भवति । कदाचित् क्षणमपि विलम्बो न भवति । ओडिशाराज्ये सामन्तचन्द्रशेखरस्य गणनानुसारं पञ्चाङ्गं प्रचलति । भारतीयानां समयज्ञानं नास्ति इति केचन मूढाः इण्डियान् टाइम् इति उक्त्वा यत् आत्मप्रवञ्चनं कुर्वन्ति तत् नोचितम् । समयानुवर्त्तिता मानवस्य महान् गुणः ।

## टिप्पणी

समाप्य - ଶେଷକରି (समापनं विधाय) । दत्तवान् - ଦେଲେ (अददात्) । प्राप्तवान् - ପାଇଲେ (लब्धवान्) । गन्तुम् - ଗମନ କରିବାକୁ (गमनं कर्त्तुम्) । मन्दं मन्दं - ଧୀରେ ଧୀରେ (धीरं धीरम्) । उपवेष्टुम् - ବସିବାକୁ (उपवेशनं कर्त्तुम्) । अपरेद्युः - ଅନ୍ୟଦିନ (अपरस्मिन् दिवसे) । चेष्टाम् - ଚେଷ୍ଟା (यत्नम्) । पुरतः - ଆଗରେ (अभितः) । प्रसन्नः - ଖୁସି (आनन्दितः) । श्रीमन् - ମହାଶୟ (महाशय) । किञ्चित् - କିଛି (अल्पम्) । केचन - କେତେକ (कतिपयाः) । साधनानि - ଦ୍ରବ୍ୟଗୁଡ଼ିକ (द्रव्याणि) । कक्षारम्भः - ଶ୍ରେଣୀଆରମ୍ଭ (कक्षायाः आरम्भः) । अनन्तरम् - ପରେ (इतः परम्) । असौ - ସେ (सः) । यथाकालम् - ଯଥା ସମୟରେ (यथासमयम्) । परन्तु - କିନ୍ତୁ (किन्तु) । पुनरपि - ପୁଣି ମଧ୍ୟ (पुनश्च) । समागताः - ଆସିଲେ (आगच्छन्) । आगतवान् - ଆସିଥିଲେ (आगच्छत्) । सस्मितम् - ମୁରୁକି ହସି (सहास्यम्) । सर्वदा - ସବୁବେଳେ (सर्वस्मिन् काले) । मूढाः - ମୂର୍ଖମାନେ (मूर्खाः) ।

## अभ्यासः

1. **निजभाषया वाक्यद्वयेन वाक्यत्रयेण वा उत्तरं लिखत ।**

   (क) माधवः प्रथमदिवसे यदा कक्षासमीपमगच्छत् तदा किमपश्यत् ?

   (ख) द्वितीयदिवसे शिक्षकः माधवं किमवदत् ?

   (ग) तृतीयदिवसे माधवः विद्यालयं गत्वा किमपश्यत् ?

   (घ) माधवः तृतीयदिवसे कथं विस्मितः अभवत् ?

   (ङ) शिक्षकः सस्मितं माधवं किमबोधयत् ?

2. **निजभाषया एकपदात्मकं / अतिसंक्षिप्तम् उत्तरं लिखत ।**

(क) मानवस्य महान् गुण: क: ?

(ख) भारतीयानां समयज्ञानं नास्तीति के वदन्ति ?

(ग) ओडिशाराज्ये कस्य गणनानुसारं पञ्चाङ्गं प्रचलति ?

(घ) भारतीयसमय-गणनानुसारेण भारतवर्षे किं प्रचलति ?

(ङ) लज्जित: माधव: शिक्षकस्य समीपे किं कृतवान् ?

(च) कस्मिन् समये घण्टानाद: जात: ?

(छ) विद्यालयस्य सेवक: कदा आगच्छत् ?

(ज) विद्यालयस्य किं पिहितमासीत् इति माधव: अपश्यत् ?

(झ) तृतीयदिवसे माधव: बहुप्रयासेन कस्मिन् समये विद्यालयम् अगच्छत् ?

(ञ) ग्रामविद्यालये क: पाठं समाप्य उच्चविद्यालयमगच्छत् ?

3. **सन्धिविच्छेदं कुरुत ।**

कक्षारम्भ:, कक्षायामुपस्थिता:, प्राददात्, प्राप्तुमसौ, नागच्छति, केनापि, तमन्तरेण, एकोऽपि, तत्रासीत्, कश्चित् ।

4. **सन्धिं कुरुत ।**

पिहितम् + आसीत्, शिक्षका: + च, एक: + अपि, पुन: + अवदत्, आगमनम् + अपि, द्वारम् + अभित:, शास्त्र + अध्ययनम्, क्षणम् + अपि, विलम्ब: + न, न + अस्ति ।

5. **रेखाङ्कितपदानां विभक्तिनाम लिखत ।**

(क) पिता <u>सर्वाणि</u> साधनानि तस्मै दत्तवान् ।

(ख) <u>स:</u> विद्यालयम् अगच्छत् ।

(ग) भो: <u>छात्र</u> ! यथाकालंम् आगच्छतु ।

(घ) <u>छात्राणां</u> पुरत: लज्जित: अभवत् ।

(ङ) <u>क्रमेण</u> सर्वे छात्रा: समागता: ।

**6. रेखाङ्कितपदानां विभक्तिकारणं लिखत ।**

(क) <u>स</u> पूर्वम् आगतवान् ।

(ख) श्रीमन् ! अहं <u>विलम्बेन</u> नागच्छामि ।

(ग) मम <u>मनसि</u> दु:खम् ।

(घ) गच्छता <u>कालेन</u> स: अवगतवान् ।

(ङ) <u>ओडिशाराज्ये</u> पञ्चाङ्गं प्रचलति ।

**7. वाक्यानि रचयत ।**

दत्तवान्, तस्मै, पूर्वम्, क्रमेण, पुरत:, अन्तरेण ।

**8. शुद्धम् उत्तरं निरूपयत ।**

(क) माधव: कदा कक्षारम्भ: इति सूचनां प्राप्तवान् ?

(i) अष्टवादने (ii) दशवादने

(iii) नववादने (iv) पंचवादने

(ख) क: माधवाय कक्षायामुपवेष्टुम् अनुमतिं प्राददात् ?

(i) अध्यक्ष: (ii) शिक्षक:

(iii) सैनिक: (iv) सेवक:

(ग) कदा घण्टानाद: जात: ?

(i) नववादने (ii) एकादशवादने

(iii) सप्तवादने (iv) एकवादने

(घ) के इण्डियान् टाइम् इति उक्त्वा आत्मप्रवञ्चनं कुर्वन्ति ?

(i) शिक्षिता: (ii) अभिज्ञा:

(iii) मूढा: (iv) चतुरा:

(ङ) कः शिक्षकस्य समीपे क्षमायाचनां कृतवान् ?

(i) प्रमोदः (ii) सत्यनारायणः

(iii) वृन्दावनः (iv) माधवः

**9. शून्यस्थानानि पूरयत । (कोष्ठकात्)**

(क) ____________ अध्ययनं कर्त्तुं शक्यम् ।

(ख) पूर्वमागमनमपि न ____________ ।

(ग) अद्य अहं ____________ नागच्छामि ।

(घ) मम ____________ दुःखम् ।

(ङ) छात्राणां ____________ सः लज्जितः अभवत् ।

| |
|---|
| विलम्बेन, पुरतः, किञ्चित्, मनसि, साधु |

●●●